NO: 45/2

श्रीकाशीविश्वनाथपुरीमेंमहल्लाछोटकीपियरीपरबाबूकोलेश्वरसिंहकेमकानमेंबाबूकिशु
नदयालसिंहकेगणेशप्रभाकरछा पाखानेमेंजागदीशीपंच
लक्षणीछापीगईजिसेलेनाहोयउसे चौकमेंनईसड़कपरबाबू
कोलेश्वरसिंहकेदुकानपरमिलेगीशोधावालशास्त्रीप्रभुणेनेलिखाहरिनंदन छापनेवालारामदत्त

अथ जागदीशीपंचलक्षणीप्रारम्भः

पं॰ जा॰ श्रीगणेशाय नमः॥ समारब्धेति॥ समारब्धं यदनुमानप्रामाण्यपरीक्षणं तत्कारणीभूतं यद्व्याप्तिग्रहोपायप्रतिपादनं तन्निदानं व्याप्तिस्वरू-
१ पनिरूपणमित्यर्थः। तथा च प्रामाण्यव्यवस्थापनोपोद्घातसंगत्या व्याप्तिस्वरूपनिरूपणमिति भावः। अव्याप्यवृत्तीति। कपिसंयोगीए-
नद्वृक्षत्वादित्यादावव्याप्तिरित्यर्थः। इदं च येन रूपेण येन सम्बन्धेन च साध्यत्वं तदवच्छिन्नप्रतियोगिताकसाध्याभावस्य प्रवेशमाह
सा। अन्यथा तु व्याप्यवृत्तिसाध्यकस्थलेपि विशिष्टाभावादिकमादाय दोषो बोध्यः। अव्याप्यवृत्तिसाध्यकेप्याकाशादिहेतावव्याप्त्यभावा

समारब्धानुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादननिदानं व्याप्तिस्वरूपनिरूपणमारभते
नन्वित्यादिना साध्याभाववदवृत्तित्वस्याव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिमाशंक्याह साध्यवद्भिन्नेति। सा-
ध्यवद्भिन्ने यः(दाह॥ सद्धेताविति॥ वृत्तिमद्धेतावित्यर्थः। ननु साध्यवद्भिन्नो यः साध्याभाववानित्यर्थे साध्याभाववत्पदवैयर्थ्यं साध्यवद्भिन्नावृत्ति-
त्वस्यैव सम्यक्त्वात्। न चावृत्तित्वेन समं साध्यवद्भिन्नस्यान्वयाविवक्षणात् साध्याभाववता सममेव तादात्म्येनान्वयविवक्षणान्न वैयर्थ्य-
मिति वाच्यं। तथा सति। साध्यवद्भिन्नात्मको यो मत्वर्थः। संबंधी तद्वृत्तित्वस्यैव सम्यक्त्वेन साध्याभावपदव्यर्थतापत्तेः अतः सप्तमी
समासं समर्थ्य व्याचष्टे॥ साध्यवद्भिन्न इति॥ तथा च साध्यवद्भिन्नस्यावृत्तावनन्वयाद्यथासन्निवेशे न वैयर्थ्यम्। साध्याभावे साध्यव- राम
द्भिन्नवृत्तित्वविशेषणं त्वव्याप्यवृत्तिसाध्यकसंग्रहार्थमेवेत्याशयः। साध्यवद्भिन्नवृत्तिद्रव्यत्वादिमति धूमादेः सत्त्वादव्याप्तिरसंभवो वा १

स्यात्। अतः साध्याभावेति। न च कपिसंयोगी एतद्वृक्षत्वादित्यादेः संग्रहार्थमधिकरणभेदेनाभावभेदमादायैव लक्षणमिदं कार्यं तथा च साध्यवद्भिन्ने यो भावस्तद्वृत्तित्वमित्यस्यैव सम्यक्त्वात्साध्यपदं व्यर्थमिति वाच्यं प्रतियोगितासंसर्गेण साध्यीयत्वेनैव साध्याभावस्य प्रवेशः न त्वभावत्वेनापीति न हैयर्थ्यशंकानवकाशात्। वस्तुतस्तु स्वप्रतियोगितावच्छेदकसंसर्गेण साध्यवद्भिन्ने वर्तते यः साध्यतावच्छेदकसंबंधेन साध्यीयोऽभावस्तद्वृत्तित्वमर्थः। तथा च साध्यतावच्छेदकसंबंधेन साध्यीयत्वार्थकस्य साध्यपदस्यानुक्तौ स्वप्रतियोगितावच्छेदकीभूतसमवायादिसंसर्गेण वन्ह्यादिमतोऽन्यस्मिन्पर्वतादौ वर्तते यः समवायसंबंधाद्यवच्छिन्नवन्ह्यभावस्तद्वृत्तिधूमादेः सत्वादव्याप्तिः स्यादतस्तदुपात्तमिति नव्याः। केचित्तु व्याप्यवृत्तित्वाऽव्याप्यवृत्तित्वादिरूपविरुद्धधर्माध्यासात्संयोगाद्यभावस्यैव द्रव्यगुणाधिकरणभेदेन भेदो न तु गगनाद्यभावस्यापि मानाभावात्तथा च साध्यवद्भिन्नगगनाद्यभाववति धूमादेः सत्वादव्याप्तिरतः साध्यपदमित्याहुः। तन्मतेदं गुणे गगनाद्यभावे गुणत्वादिसामानाधिकरण्यं न तु द्रव्ये गगनाद्यभावे न यात्वमित्यादिप्रतीत्या गुणत्वसामानाधिकरण्यतदभावयोर्विरुद्धधर्मयोः संभवादिति दिक्। न च घटत्वघटाकाशसंयोगान्यतरत्वावच्छिन्नाभाववान् गगनत्वादित्यत्राव्याप्तिः साध्यवद्भिन्ने घटे वर्तमानस्य गगनादिसंयोगात्मकस्य साध्याभावस्याधिकरणे गगनत्वहेतोः सत्वादिति वाच्यम्। अभावाभावस्यातिरिक्ततामते एवैतल्लक्षणाकरणादिति भावः   भिन्नत्वइति। द्रव्यनिष्ठसंयोगाभाववतो भिन्नत्वेत्यर्थः मानाभावादिति। तथा चात्राव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिरिति भावः॥ हेतोरिति। न च साध्यवत्प्रतियोगिकान्योन्याभावस्य केवलान्वयित्वादसंभव एव

पं॰जा॰ २ वक्तुमुचितो नाव्याप्तिरितिवाच्यं। वन्हिमान् गगनादित्यत्र गगनादिहेतौ लक्षणसंभवात्। तस्यापि सद्धेतुतया स्वयं वक्ष्यमाणत्वादिति भावः
साध्यपदस्य सिद्धिकर्मत्वेन तद्व्यक्तिपरतया तत्तद्व्यक्त्यवच्छिन्नान्योन्याभावासामानाधिकरण्यरूपपर्यवसितार्थस्य द्रव्यं पृथिवीत्वादि
त्यादावेव लक्षणसंभवात् द्रव्यत्ववती पृथिवीत्वादित्यादावव्याप्तिः कथमित्यपि वदंति। तन्न सकलस्य साध्यप्रतियोगिकाभावस्याधिकरणाप्र
सिद्ध्याव्यभिचारिण्यतिव्याप्तिवारणार्थं यदि साध्याभावस्य विशेषणं साकल्यं तदा वन्हिमान् धूमादित्यादिसद्धेतावव्याप्तिः तत्रापि तत्तद्ध्रदपक्षा

साध्याभाववत्ह्रदवृत्तित्वमित्यर्थः। कर्मादौ संयोगाद्यभावस्य भिन्नत्वे मानाभावादाह साध्यवदिति हेतोः साध्यवत्त्वस्य भिन्न
हृष्टांन वृत्तित्वेनाव्याप्तेराह सकलेति साकल्यं साध्याभाववति साध्ये च बोध्यं साध्याभावो वा साध्यतावच्छेदकाव
च्छिन्नप्रतियोगिताको ग्राह्यः तेन विपक्षैकदेशनिष्ठाभावप्रतियोगिनि व्यभिचारिणि नातिव्याप्तिः नवा नानाव्यक्तिसाध्य
कसद्धेतावव्याप्तिः ४ वृत्तित्वावच्छिन्नाभावरूपस्य तत्तत्पक्षवृत्तित्वावच्छिन्नाभावरूपस्य वा साध्यप्रतियोगिकाभावस्तोम
स्याधिकरणाप्रसिद्धेरत आह साकल्यं साध्याभाववतीति न यथा च साकल्येन साध्याभावविशेषणमतो नाप्रसिद्धिरिति भावः नन्वेवम
पि साध्याभाववत्त्वनिखिलांतर्गते महानसादौ वर्तमानस्याभावस्य प्रतियोगित्वं धूमादौ नास्तीत्यव्याप्तिरत एवस्य मत आह। साध्ये चे
ति। तथा च सपक्षो महानसादिः न सकलसाध्यस्याभाववान् इत्यदोषः यं च तु व्यभिचारिण्यतिव्याप्तिवारणार्थं साध्याभाववति यावत् रा॰म २

त्वविशेषणे दत्ते एव साध्ये यावत्त्वमव्याप्तिवारकतया सार्थकं भवतीत्यतः साध्याभाववत्त्वेव साकल्यं प्राकोजयति साकल्यमित्यादिने
त्ववनारयंतितन्मंदं साध्याभाववत्तिसाकल्यानुक्तावप्यतिव्याप्तिवारकतयैव साध्ये साकल्यविशेषणस्य प्रथमतः सार्थक्यसंभवात्।
अन्यथा गगनावृत्तिधर्मवान् द्रव्यत्वादित्यादौ पटत्वादिलक्षणेन तत्साध्यव्यक्त्यभाववद्गुणादिनिष्ठाभावप्रतियोगिनि द्रव्यत्वादाव
तिप्रसंगादिति ध्येयं न तु साध्यवत्यपि हितावद्यवच्छिन्नप्रतियोगिताकस्य सकलसाध्यप्रतियोगिताकाभावस्य सत्त्वादसंभवः किंच सकल

अव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिसत्त्वेनाव्याप्तेर्व्यभिचारिणि चाव्याप्यवृत्तावतिव्याप्तेर्वारणायाभावद्वये प्रतियोगि
वैयधिकरण्यं बोध्यं हेत्वभावेऽपि प्रतियोगितानवच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणः तत्प्रतियोगित्वं च हे
तुतानवच्छेदकरूपेण बोध्यं तेन द्रव्यत्वादौ साध्ये विशिष्टसत्तादौ नाव्याप्तिः ११ पक्षेतरसाध्यनाम्ना सकलसाध्यप्रतियोगि

ताकाभाववतोऽनुपस्थापनानेन संभवे सकलपदस्य कर्मधारयोऽप्यनुपपन्न इत्यत आह साध्याभाववेति। तथा च साध्याभाववत्त्वेव साक
ल्यं देयं न तु साध्येऽपीति भावः साध्याभाववत्तिसाकल्यप्रयोजनमाह तेनेति। विपक्षैकदेशः कश्चिद्विपक्षः साध्यनिष्ठसाकल्यस्य साध्यता
वच्छेदकावच्छिन्नाभावस्य च विवक्षायाः फलमाह। नवेति। एकव्यक्तिसाध्यके सकलसाध्योक्तावप्यव्याप्तिरग्रे स्यास्यतीत्याशयेन नाने
त्युक्तम्॥ अव्याप्यवृत्तीति। कपिसंयोग्येतत्त्वादित्यादावित्यर्थः यद्यप्यग्रे हेत्वभावस्यापि प्रतियोगिवैयधिकरण्यावच्छिन्नस्यैव निवेशः

करणीयद्रव्याप्य इति हेतावप्यव्याप्तिः संभवति। तथापि यथाश्रुतमूलस्य न तत्राव्याप्तिरित्यावेदयितुं व्याप्य इति हेतूक्तिः। व्यभिचारिणी
ति। एतद्वृक्षत्ववान् कपिसंयोगादित्यादावित्यर्थः। अभाववद्य इति॥ साध्याभावे हेत्वभावे चेत्यर्थः। अत्र च साध्याभावे प्रतियोगिवैय
धिकरण्यं साध्यताघटकसम्बन्धेन प्रतियोगिनो यदनधिकरणं तद्वृत्तित्वं तेन धूमाद्यभाववतोऽप्ययःपिंडादेः कालादिसंबंधेन धूमादि
मत्त्वेपि नातिव्याप्तिः हेत्वभावे प्रतियोगिवैयधिकरण्यं तु प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वघटितं वाच्यं तेनायमा
साज्ञानादित्यादौ साध्याभाववतो घटादेर्विषयतया हेत्वभावप्रतियोगिमत्त्वेपि नाव्याप्तिः। हेत्वभावोपीति। अपिना साध्याभावसमुच्च
यस्तेन विशिष्टसत्तावान् जातेरित्यादौ नातिव्याप्तिः यद्यपि साध्याभावोपीत्येव क्रमानुरोधादुचितं अपिशब्दादेव हेत्वभावस्य लाभसं
भवात्। तथापि तत्प्रतियोगित्वं चेत्यग्रेतनतत्पदेनानिर्दिष्टहेत्वभावपरामर्शासंभवाद्धेत्वभावप्रतियोगित्वं चेत्यभिधाने च ग्रंथगौरवं
स्यादितीत्थमभिधानम्। प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगीति प्रतियोगिपदं प्रतियोगितावच्छेदकताघटकसंबंधेनावच्छेद
कस्य वैशिष्ट्यलाभाय तेन हृदादौ कालिकादिसंबंधेन धूमत्वाद्यवच्छिन्नस्य काष्ठादेः संयोगसंबंधेन सत्त्वेपि नाव्याप्तिः तत्प्रतियोगि
त्वं हेत्वभावप्रतियोगित्वं हेतुतावच्छेदकरूपेणेति हेतुतावच्छेदकसंबन्धेनेत्यपि बोध्यम् तेनात्मभिन्नं द्रव्यत्वादित्यादौ साध्याभाववता
त्मनि वर्तमानस्य प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिव्यधिकरणस्य कालिकादिसंबंधावच्छिन्नद्रव्यत्वत्वावच्छिन्नाभावस्य
प्रतियोगित्वेपि द्रव्यत्वस्य नातिव्याप्तिः न च हेतुतावच्छेदकसंबन्धेन प्रतियोगिवैयधिकरण्योक्त्यैवातिव्याप्तिवारणसंभवात्। हेतुता

वच्छेदकसंबंधेन प्रतियोगित्वविवक्षा व्यर्थं निवाच्यं तथासति निर्धूमत्वव्याप्यवान् निर्वन्हित्वादित्यादौ निर्वन्हित्व भेदमादायैव लक्ष णसंभवे निर्धूमत्वव्याप्येत्याद्युत्तरग्रंथे वक्ष्यमाणाव्याप्यलग्नकतापत्तेरिति ध्येयं हेत्वभावेपि प्रतियोगिनावच्छेदकावच्छिन्नप्रतियोगिवै यधिकरण्यविवक्षायाः फलमाह। तेनद्रव्यत्वादावितिं। अन्यथासाध्याभाववति गुणादौ विशिष्टसत्ताभावस्य सत्तारूपप्रतियोगिसमाना धिकरणत्वादव्याप्तिरेव स्यादिति भावः अत्र द्रव्यत्वस्य साध्यतायां सकलसाध्याप्रसिद्ध्याऽव्याप्तेरुक्तविवक्षायाप्यप्रतीकारादादि

नवाविशिष्टसत्तात्वादिनानादृशाभावप्रतियोगिनि सत्तादावतिप्रसंगः यत्रैकव्यक्तिकं साध्यं विपक्षो वा तत्र निर्धूम त्वादिव्याप्यत्वेन साध्ये निर्वन्हित्वादौ चाव्याप्तिः तत्र हेत्वभावस्य वन्ह्यादेः प्रत्येकं यावद्विपक्षावृत्तित्वादत आह सा ध्यवदिति अत्रान्योन्याभावस्य साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वं तु स्वतिबललभ्यं नहि भवति नीलो घटो घटान्य इति॥

पदं तेन गुणवत्त्वादिसाध्यस्योपसंग्रहः द्रव्येतरासमवेतमात्रं वा प्रकृते द्रव्यत्वमिति ध्येयं॥ हेतुतावच्छेदकरूपेण हेत्वभावप्रतियो गित्वविवक्षायाः फलमाह। नवेति। सत्त्वादाविति द्रव्यत्वादौ साध्ये इत्यनुवर्तते। यत्रैकव्यक्तिकमिति। तथा च द्रव्यं पृथिवीत्वादित्याद वव्याप्तिः तत्र सकलसाध्याप्रसिद्धेरित्यर्थः नन्वितोप्यस्वरसात्साध्यसामान्याभावस्यैव निवेशितत्वात्साध्ये साकल्यं न देयमेवेत्यत आह। विपक्षोवेति। एकव्यक्तिकमित्यनुषज्यते। तथा च यत्रैकव्यक्तिरेव साध्याभाववती तत्र गगनावृत्तिधर्मवान् गगनान्यत्वादित्या

पं.जा. दावव्याप्तिः साध्याभाववद्वृत्तेः साकल्याप्रसिद्धेरित्यर्थः। ननु साध्यादिभेदेन व्याप्तेर्भेदाद्यत्रैक एव विपक्षस्तत्र तल्लक्षणे साध्याभाववति साकल्य
४ विशेषणं न देयमशेषत्वरूपं वा साकल्यं निवेश्य मनोदोषान्तरमाह। निर्धूमत्वव्याप्य इति। निर्धूमत्वस्य साध्यत्वे यत्रैकव्यक्तिकमित्यनेनैव गगना
र्थनास्यादनो व्याप्यपर्यन्तं निर्धूमत्वव्याप्यस्यापि स्नेहादेः स्नेहत्वादिना साध्यत्वे वह्न्यभावस्य व्यभिचारित्वादसंग्रहेण दोषायेत्यनउ
कम्। नत्वेन साध्य इति। निर्धूमत्वव्याप्यत्वेन साध्य इत्यर्थः। प्रत्येकमिति। तथा च हेत्वभावस्य महानसीयवह्नेः साध्याभाववत्सकलान्तर्गतपर्वता
यवृत्तित्वादव्याप्तिरिति भावः। अत्र निरुक्तप्रतियोगिवैयधिकरण्यावच्छिन्नसाध्याभावव्यापकतावच्छेदकं निरुक्तवैयधिकरण्या
वच्छिन्नयद्धर्मावच्छिन्नाभावत्वं तद्धर्मवत्त्वं व्याप्तिरित्युक्तौ तु नैष दोष इति ध्येयम्। ननु साध्यवत्प्रतियोगिकान्यतरस्य धूमादिमति सत्त्वादव्या
प्तिरत आह। अत्रेति। तथा च साध्यवत्पदेन निरूढलक्षणयोपस्थापितस्य साध्यतावच्छेदकविशिष्टसाध्यवत्त्वावच्छिन्नप्रतियोगि
ताकस्यान्यपदार्थैकदेशेऽन्यत्वेनादात्म्येनान्वयात् साध्यवति च विशिष्टसाध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदासत्त्वान्न व्याप्तिः गुरुधर्म
स्यावच्छेदकत्वोपगमाच्च द्रव्यं पृथिवीत्वादित्यादौ द्रव्यत्वत्वविशिष्टद्रव्यत्वावच्छिन्नभेदाप्रसिद्ध्या नाव्याप्तिरिति भावः। यद्धर्मवि
शिष्टबोधकपदसमभिव्याहृतेनान्यादिपदेनोपस्थापितेऽन्यत्वादौ तद्धर्मावच्छिन्नप्रतियोगिताकत्वप्रकारेणैव तादात्म्येनान्वयो
ननु तद्धर्माश्रयप्रतियोगिताकत्वेनेत्यत्र त्वन्यतो प्रमाणमाह॥ नहीति॥ तथा च तादृशव्युत्पत्त्यस्वीकारे नीलघटे घटप्रतियोगिकभेद

सत्त्वान्नीलो घटो घटान्य इत्यपि व्यवहारः स्यादिति भावः। अत्र च द्रव्यं घटान्यदित्यादिप्रयोगात् यन्निष्ठप्रतियोगिताकत्वेनान्यादिपदे

नभेदोबोध्यतेनह्इतिधर्मस्यैवानुयोगितावच्छेदकत्वात्नतएवघटोघटान्यइत्यस्यवारणसंभवात्नीलघटत्वस्यानुयोगितावच्छे
दकत्वपर्यंतानुधावनमितिमंतव्यंनीलोघटोघटान्यइत्यस्यैवसम्यक्पाठःतथैवप्रकृतोपयोगित्वसंगतेःघटान्यइतिपाठस्तुसाध्य
वइत्येत्यत्रपंचमीसमासेलुप्तविभक्तिस्थलेप्रतियोगित्वप्रकृतार्थतावच्छेदकावच्छिन्नत्वस्यसंसर्गमर्यादयाभानमाहत्यक
थंचित्संगमनीयःघटःपटोनेत्यादौतुपटपदंमुख्यार्थपरमेवनतुप्रकृतइवपटत्वावच्छिन्नप्रतियोगिताकपरंनिपातातिरिक्त
स्थलेएवनामार्थयोरभेदातिरिक्तान्वयाभ्युपगन्तृनयानञोपस्थापितेभेदेपटत्वावच्छिन्नप्रतियोगिताकत्वसंसर्गेणैवपटस्यान्व
यसंभवात्।पटत्वावच्छिन्नप्रतियोगिताकत्वंतुपटत्वमवच्छिन्नत्वंप्रतियोगित्वंचेतित्रितयमेवविशेषणभावापन्नंसंसर्गःन
तुवस्तुगत्यापटत्वावच्छिन्नंयत्प्रतियोगित्वंतन्मात्रंपटोनेत्यत्रपटत्वावच्छिन्नत्वस्याप्यनुभवसिद्धत्वात्अन्यथाप्रतियोगिना
व्यक्तिभिरेवतत्तद्विशिष्टबुद्ध्युपपत्तौपटत्वादेस्तदवच्छेदकत्वमेवनस्यात्मानाभावात्अतएवकेवलान्वयिप्रमेयेवन्हिर्नास्तीत्यत्रवन्हि
त्वंतदवच्छिन्नत्वंप्रतियोगित्वंचसंसर्गमर्यादयाभासतइतिस्वयमप्युक्तंइत्थमेवचप्रमेयंनास्तिकंबुग्रीवादिमान्नास्तीत्यादिशाब्दबो
धानांसंसर्गकोटावेवप्रतियोगितायाप्रमेयत्वावच्छिन्नत्वावगाहितयाभ्रमत्वंसंसर्गप्रकारसाधारणविशेष्यविशेषणभावस्यैव
भ्रमत्वघटकत्वात्अन्यथास्वरूपसम्बन्धेनप्रमेयत्वाद्यवच्छिन्नप्रतियोगित्वस्यालीकतयाःखंडनत्संबंधेनप्रमेयस्याभावेधर्मि
ण्यन्वयासंभवेनभ्रमत्वानुपपत्तेःसदुपरागेणाप्यसतःसंसर्गमर्यादयाभानस्यानंगीकारात्क्लृप्तेनपटत्वावच्छिन्नप्रतियोगित्वसंवं

पं.जा. धेन चाभावे प्रमेयस्य सत्वेन तादृशसम्बन्धेन भ्रमत्वस्य वक्तुमशक्यत्वात् घटत्वादेरन्वयितानवच्छेदकतया तदवच्छिन्नप्रतियोगित्व
५ संबंधेन प्रमेयत्वादिविशिष्टस्यान्वये निराकांक्षत्वाच्च। अन्यथा घटवत्यपि घटो नास्तीत्यादेः प्रमाणत्वापत्तेः न तद्घटत्वावच्छिन्न
प्रतियोगित्वसम्बन्धेन घटविशिष्टस्य घटविशेषाभावस्य तत्र सत्वात्। एतेन सत्तासमवायिन्यपि गुणादौ विशिष्टसत्तात्वावच्छिन्नस्य स
मवायेनासत्ववत् घटत्वावच्छिन्नप्रतियोगित्वसंबंधेन घटत्वावच्छिन्नवतोपि घटाद्यभावस्य न तादृशसंबंधेन प्रमेयत्वावच्छिन्न
वत्वमतः प्रमेयं नास्तीत्यादौ घटत्वावच्छिन्नप्रतियोगित्वसंबंधेन प्रमेयत्वावच्छिन्नस्यैवाभावांशे भ्रमत्वमित्यपि प्रत्युक्तं घटत्वादेर
न्वयितानवच्छेदकतया तदवच्छिन्नप्रतियोगितासम्बन्धेन प्रमेयत्वविशिष्टस्यान्वये निराकांक्षतया तथा शाब्दस्यासंभवादिति
ध्येयम्। नीलो घटो नास्तीत्यादौ तु नीलघटत्वस्यान्वयितावच्छेदकत्वेन तादृशधर्मावच्छिन्नप्रतियोगित्वमेव संसर्गो न तु नोभ
लत्व घटत्वादिप्रत्येकावच्छिन्नप्रतियोगित्वं नीलपटस्य पीतघटस्य वाधिकरणे तादृशप्रयोगापलापापत्तेः नीलोपलक्षितस्य घटत्व
मात्रस्यान्वयितावच्छेदकत्वे तु घटत्वावच्छिन्नप्रतियोगित्वमेव तथा संयोगेन घटो नास्तीत्यादौ तु तृतीयाविभक्तेर्नावच्छिन्नत्वम
र्थः संसर्गीभूतप्रतियोगिताया तदन्वयासंभवात् किंत्ववच्छिन्नप्रतियोगिताकत्वं प्रतियोगित्वमात्रं वावच्छिन्नत्वसंसर्गेण संयो
गादेः तत्रान्वयादेव विशिष्टलाभसंभवात् न चैवं संयोगेन घटाभावस्यैव समवायेन घटविशिष्टद्रव्यत्वाभाव तया समवायेनक राम
पाले घटो नास्तीति व्यवहारापत्तिः तृतीयान्तसमभिव्याहारस्थले तद्रूपस्याप्यप्रतियोगित्वस्यैव संसर्गतया व्युत्पन्नत्वात् सम ५

वायावच्छिन्नघटप्रतियोगिताकाभावस्य च कपाले विरहात् अस्तु वा घटत्वावच्छिन्नस्यैव संयोगसंबंधावच्छिन्नत्वस्यापि प्रतियोगितायां
शेसंसर्गमर्यादयैव भानं तन्नीयां न समभिव्याहारस्य नियामकत्वात्त्वनातिप्रसंगः घटानधिकरणं भूतलमित्यादौ तु लक्षणयाधिकर
णपदमेव घटाधिकरणार्थकं घटपदं तात्पर्यग्राहकं अन्यथानधिकरणपदेनाधिकरणसामान्यभिन्नत्वोक्तौ भूतले तस्य बाधः स्यात्
नच घटान्वितस्यैवाधिकरणभेदस्य तत्र न ओबोधनीयः समासांतर्गतेन नञ्ञ्नर्पदार्थमात्रान्वयित्वव्युत्पत्तेः अन्यथा नीलो घटो घटस्सा

> नापीति। साध्यसमानाधिकरणं यस्य यदधिकरणानधिकरणं साध्यं न तत्त्वं। साध्यनिष्ठासामानाधिकरण्यप्रतियोगित्व
> म्। साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वमिति यावत्। तदनधिकरणत्वमित्यर्थः। साध्यवद्भिन्नस्य साध्यनिष्ठा
> धेयत्वानिरूपकत्वान्न हृनैनानतिप्रसंगः॥११

द्रौ नीलघटान्यस्य घटत्वं नीलाप्रमेयः पटइत्यादौ च नीलप्रमेयान्यस्य पटत्वं प्रतीयेत
वक्तृतः ससंबंधिकपदस्थले व्युत्पत्तिवैचित्र्यात्। प्रतियोगितानवच्छेदकं घटानधिकरणं भूतलमित्यादौ घटाद्यन्वितस्यैवाधिकर
णादेर्भेदो भासते अन्यत्र त्रिपदतत्पुरुषानुपगमेपि घटस्यानाधिकरणं प्रतियोगितायानावच्छेदकमित्यादिरीत्या त्रिपदतत्पुरुषेण
विशिष्टलाभसंभवादिति तु परमार्थः पीतः शंखो नास्तीत्यादौ शाब्दबोधस्तु न शंखत्वावच्छिन्नतया प्रतियोगित्वमवगाहते तन्मात्रस्या
न्वयिनानवच्छेदकत्वात् शंखवत्तया निश्चितेधर्मिण्यपि ताहशः प्रयोगात् परंतु पीतशंखत्वावच्छिन्नप्रतियोगितात्वेन संसर्गमर्या

दण्डप्रतियोगित्वमवगाहते न जातिघटानां यद्धर्मविशिष्टवैशिष्ट्यावगाहित्वो यस्याप्यभावधर्मिकान्वयबोधजनकत्वं तद्धर्मावच्छिन्नप्रतियोगिताकत्वेन प्रतियोगितासंसर्गकान्वयबोधजनकत्वमुत्पत्तेः इयांस्तु विशेषः यद्घटो नास्तीत्यादिशाब्दे सांसर्गिकप्रतियोगित्वावगाहितामसिद्धेन घटत्वावच्छिन्नप्रतियोगिताकत्वेन निरूपितापीनः शंखो नास्तीत्यादौ तु पीनशंखत्वावच्छिन्नप्रतियोगिताकत्वेनाप्रसिद्धेनैवेत्यादिकं बहुतरमूहनीयं॥ इति जागदीशीपंचलक्षणी संपूर्णा॥ श्रीगणाधीशाय नमः॥ साध्यासामानाधिकरण्यपदस्य साध्यवद्भिन्नवृत्तित्वार्थकत्वे साध्यवैयधिकरण्येत्यादिउत्तरलक्षणेन पौनरुक्त्यापत्तिरतो व्याचष्टे साध्यसमानाधिकरणं यस्येति तत्त्वमिति परणान्वयः वन्हिमात्रस्यैव व्यधिकरणत्वात् न धूमसमानाधिकरणत्वात् वन्हिमान्धूमादित्यादावव्याप्तेराह। यदधिकरणेति। यदधिकरणमनधिकरणं यस्येति व्युत्पत्त्या यस्याधिकरणं साध्यानधिकरणं तत्त्वमित्यर्थः तत्र धूमाधिकरणं तु न वन्हिसामान्यानधिकरणमतो नाव्याप्तिरिति भावः ननु घटादिस्वरूपं यत्किंचिद्यदनधिकरणं साध्यीभूतधूमाद्यनधिकरणं तद्व्यक्तित्वानधिकरणत्वं वन्ह्यादेरप्यतो धूमवान्वन्हेरित्यादावतिव्याप्तिः। यद्यदनधिकरणं तत्तद्व्यक्तित्वानधिकरणत्वोक्तौ तु महागौरवमत आह। साध्यनिष्ठेति। साध्यनिष्ठाभावप्रतियोगित्वं सद्धेतोरप्यस्तीत्यतः सामानाधिकरण्याभावउक्तः नच साध्यनिष्ठस्य सामानाधिकरण्याभावस्य प्रतियोगित्वं सामानाधिकरण्यएव ननु वन्ह्यादाविति सद्धेतावतिव्याप्तिः साध्यनिष्ठाभावप्रतियोगिवृत्तित्वनिरूपकाधिकरणवृत्तित्वस्याविवक्षितत्वात् वस्तुनः असमानाधिकरण्यं सामानाधिकरण्यसंबंधेनाभावइति परमार्थः। नचैवं द्रव्यं विशि

इसत्वादिसाववव्याप्तिः सामानाधिकरण्याभावस्याव्याप्यवृत्तित्वेन साध्यनिष्ठत्वात् एतद्दूषणरसेनैव वाकल्यांतरानुसरणादित्यपरे नन्वेवमपि वन्हिमान्धूमादित्यादिविषमव्याप्ते हेतावव्याप्तिः महानसीयवन्हिनिष्ठस्य पर्वतवृत्तित्वाद्यभावस्य प्रतियोगिभूतं यदाधेयत्वं तन्निरूपके पर्वतादौ धूमादेर्वर्तमानत्वात्साध्यसामान्यनिष्ठाभावप्रतियोग्याधेयतानिरूपकाधिकरणवृत्तित्वोक्तौ च महागौरवमत आह। साध्यनिष्ठाधेयत्वेति। अत्राधेयत्वं साध्यताघटकसंबंधेन ग्राह्यं तेन रूपवान्महाकालत्वादित्यादौ संबंधसामान्येन रूपनिष्ठाधेयत्वानिरूपके गगनादौ हेतोरवृत्तित्वेपि नातिव्याप्तिः सद्धेतौ साध्यवद्भिन्नवृत्तौ नत्र साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वमवश्यहेतुताघटकसम्बंधेन वाच्यमन्यथा वन्हिनिष्ठाधेयत्वानिरूपके स्वावयवे स

साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकाभावप्रतियोग्यधिकरणतासामान्यकत्वमिति निष्कर्षस्तेन सत्तावान्द्रव्यत्वादित्यादौ न दोषः॥

समवायादिना धूमादेः सत्त्वाद्व्याप्यवृत्तेः तथा च सत्तावान्द्रव्यत्वादित्यादावव्याप्तिः साध्यनिष्ठाधेयत्वानिरूपके जात्यादौ समवायेन संयोगेन वावृत्त्यप्रसिद्धेः किंच द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिः द्रव्यत्वनिष्ठाधेयत्वानिरूपकगुणादिवृत्तित्वस्य विशिष्टसत्तायां सत्त्वादित्यत आह साध्यनिष्ठेति। धूमनिष्ठाधेयत्वानिरूपके भूतलादौ वन्ह्याद्यधिकरणत्वाभावसत्त्वाद्व्यभिचारिण्यतिव्याप्तिरतो व्यापकेति व्यापकत्वं तु प्रतियोगिवैयधिकरण्याघटितमेव ग्राह्यं तेन

JAMMU. Sharika Ma... ...

संयोगेनवन्ह्यधिकरणत्वस्याव्याप्यइतिनयानरभावस्याननायःपिंडइतित्वेपिनानिव्याप्तिःवन्ह्यधिकरणत्वगगनोभयत्वावच्छि
न्नाभावस्य धूमनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वादितिव्याप्तिस्तुसामान्यपरंतथाचहेतुतावच्छेदकसंबंधाव
च्छिन्नयद्धर्मावच्छिन्नाधिकरणत्वसामान्यभावत्वेनसाध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वंतद्धर्मवत्त्वमर्थः ते
नवन्हिनिष्ठाधेयत्वानिरूपकाधिकरणजलादौकालिकसंबंधेनधूमाधिकरणतायाःसत्वेपिनाव्याप्तिःनवावन्ह्यधिकरण
त्वाभावस्यापिप्रमेयत्वादिनाधूमनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वेप्यतिव्याप्तिःनचहेतुतावच्छेदकसंम्बंधे
नयद्धर्मावच्छिन्नाभावत्वेनतादृशाधिकरणताव्यापकत्वमित्यस्यैवस म्यक्त्वेधिकरणत्वाभावपर्यंतानुप्रवेशोव्यर्थइतिवा
च्यम् इसनियामकसंबंधेनहेतुतायामव्याप्तिप्रसंगात्तादृशसंबंधावच्छिन्नप्रतियोगित्वाप्रसिद्धेः अस्माकंतुतादृशसंबं
धेनयद्धेतुसंबंधित्वंतत्स्वस्वरूपसंबंधावच्छिन्नाभावप्रतियोगित्वमादायलक्षणसंभवात्किंचाधिकरणत्वाप्रवेशेवन्ह्या
देःसाध्यत्वेसंयोगादिसंबंधेनरूपादिहेतावतिव्याप्त्यापत्तेःसंयोगेनरूपाद्यभावस्यकेवलान्वयितयावन्हिनिष्ठाधेयत्वनिरू
पकाधिकरणत्वव्यापकत्वादितिभावः।साध्यवद्भिन्नेति अत्रापिसाध्यवद्भिन्नत्वव्यापकाभावप्रतियोग्यधिकरणतासा
मान्यकत्वमितिनिष्कर्षोबोध्यः तेनसत्तावान्द्रव्यत्वादित्यादौनाव्याप्तिः॥ ननुप्रागुक्तस्यार्थस्यशब्दान्तरेणाभिधानमनुवा
दःसचात्रासंभवीसाध्यंयदधिकरणानधिकरणंतत्वानधिकरणत्वस्यसाध्यवद्भिन्नवृत्तित्वानधिकरणत्वस्यचया

एम

गुरुत्वसाध्यानधिकरणानधिकरणत्वशब्देनाबोधनादत आह। चरमेति। तत्ताधिकरणत्वाभावेन तत्ताभावस्याप्रवेशादिय
र्थमसंभवीत्यत उक्तं। अनतिप्रयोजनकतयेति। तथा च प्रकृतलक्षणवाक्यस्य साध्यं यदधिकरणानधिकरणं तत्ताभावे सा
ध्यस्य यदनधिकरणं तद्वृत्तित्वाभाव एव च तात्पर्यात् प्रागभिप्रेतार्थस्य शब्दान्तरेणाभिधानमेवानुवादः स चात्र संभवत्येवे
ति भावः। साध्यमित्यादि। साध्यानधिकरणेत्यादौ मध्यवर्तिनञोऽव्यासेन चरमाधिकरणत्वांशेन सहान्वयादेव तल्लाभ इ

साध्यवैयधिकरण्यं साध्यवद्भिन्नाधिकरणत्वं। चरमाधिकरणत्वांशस्यानतिप्रयोजनकतया तदपहाय द्वय
मेकोक्त्या अनूद्य दूषयति तदुभयमपीति। साध्येत्यादेः साध्यं यदधिकरणं तत्ताभावः। साध्यस्य यदनधिकरणं
तद्वृत्तित्वाभावश्चार्थः ॥१८॥ साशयः। केवलान्वयिनीति। अव्याप्तिरिति परेणान्वयः अव्याप्तेर्हेतुमाह। साध्यनिष्ठेति

।नानाव्यक्तिसाध्यके चेति मूलोक्तं धूमहेतुमभिप्रेत्य तेन शब्दवान् गगनत्वादित्यादौ नानाव्यक्तिसाध्यकाव्याप्तिविरहेऽपि न क्ष
तिः न्यूनतां परिहरति। क्वचिदिति। विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिरित्यर्थः। विशिष्टधर्मावच्छिन्नाधिकरणत्व
स्य तदवच्छिन्नाधेयत्वस्यानतिरिक्तत्वादिति भावः। यत्किंचिदिति साध्यवत्तया ज्ञातत्वावच्छिन्न इत्यर्थः। नानाधिकरण
साध्यकेति। यत्र साध्यतावच्छेदकावच्छिन्नाधिकरणनानात्वं तत्रेत्यर्थः। तेन कस्याश्चिदपि वह्निव्यक्तेर्नानाधिकरणवृत्ति

सि. जा त्वविरहेपिनवन्हिसाध्यकधूमाद्यसंग्रहः। सर्वत्रकेवलान्वयिनितद्भिन्नेचसार्वभौममतमुत्थापयति। केचित्त्विति। हेत्वधिकरणइ
२ तिसप्तम्यर्थोवच्छेद्यत्वंतच्चसाध्यवद्वृत्तित्वाभावेन्वितं। तेनैवेति। हेतुतावच्छेदकसम्बन्धेनैवेत्यर्थस्तस्यचसाध्यवद्वृत्तित्वेनसहान्व
यः साध्यवत्त्वमपियेनसंबंधेनयेनरूपेणसाध्यतातेनसंबंधेनतद्रूपावच्छिन्नवत्त्वंबोध्यम्। तेनसमवायेनवन्हेः साध्यत्वेधूमेविशिष्टस
त्त्वसाध्यकेसत्त्वादौनातिव्याप्तिः। नत्वधिकरणभिन्नत्वमिति। नत्वत्यन्ताभावत्वोक्तौ द्रव्यंसत्त्वादित्यादावतिव्याप्तिः गुणाद्यवच्छे

तत्रकेवलान्वयिनिसाध्यनिष्ठाधेयत्वानिरूपकाधिकरणाप्रसिद्ध्यानानाव्यक्तिसाध्यकेचएकसाध्यव्यक्तिनिष्ठा
धेयत्वानिरूपकाधिकरणत्वं। साधनाधिकरणव्यक्त्यन्तरस्येत्यव्याप्तिः। क्वचिद्व्यभिचारिण्यतिप्रसंगश्चाद्ये।
द्वितीयेचसाध्यवैयधिकरण्ययदिसाध्यवत्त्वावच्छिन्नप्रतियोगिताकोभेदोविवक्षितस्तदाकेवलान्वयिनि
यदिचयत्किंचित्साध्यवद्व्यक्तिभेदस्तदानानाधिकरणसाध्यकेसर्वत्राव्याप्तिः केचित्तुसाध्यसामानाधिकरण्यंहेतुतावच्छे
दकसंबन्धेन। हेत्वधिकरणेतेनैवसम्बन्धेनसाध्यवद्वृत्तित्वाभावस्तदधिकरणभिन्नत्वमर्थस्तेनधूमस्य॥

देनद्रव्यवृत्तित्वाभावस्यैवद्रव्यावच्छेदेनसत्तायामभावसत्त्वादतोभिन्नत्वपर्यन्तानुसरणंभेदस्तुनाव्याप्यवृत्तिः तद्व्याप्यवृ राम
त्तित्वेतुतादृशवृत्तित्वाभाववतीयावतीव्यक्तिस्तत्तद्भेदकूटवत्त्वंवाच्यमितिभावः॥ हेतुतावच्छेदकसंबंधेनहेत्वधिकर ८

णइत्यस्य फलमाह। स्वावयवे संयोगेनेति अवृत्तावपि न क्षतिरित्यन्वयः। तथा च तादृशसम्बन्धेन हेत्वधिकरणत्वाप्रवेशे स्वावयवा
वच्छेदेन धूमस्य वह्निमत्संयुक्तत्वाभाववत्त्वाद्वह्निमान्धूमादित्यादावव्याप्तिः स्यान्न पुनरसंभवः इदं वाच्यं ज्ञेयत्वादित्यादिकेवला
न्वयिनि लक्षणसंभवादिति भावः। अत्र चोत्पत्तिकालावच्छिन्ने घटे पृथिवीत्वे रूपवद्भिन्नत्वं नेत्यादिप्रतीत्या घटाद्यवच्छेदेन
पृथिवीत्वादौ रूपवद्भिन्नत्वाभावाभ्युपगमे हेत्वधिकरणनिष्ठमवच्छेदकत्वं निरवच्छिन्नं ग्राह्यं तेन रूपवान् पृथिवीत्वादित्यादौ
नाव्याप्तिः। तत्र घटनिष्ठावच्छेदकत्वस्योत्पत्तिकालेनावच्छेदादिति ध्येयं तेनैवेत्यस्य फलमाह। वह्निमति च समवायेनेति। हे
तुतावच्छेदकसंबन्धेन साध्यवद्भिन्नत्वानुक्तौ सम्बंधसामान्येन हेत्वधिकरणावच्छेद्यसाध्यवद्भिन्नत्वसामान्याभावेन निवे
श्यः साधनाधिकरणाद्यवच्छेद्यतादृशाभावस्याप्रसिद्धेः किंतु यत्किंचित्संबंधेन साध्यवद्भिन्नत्वाभावः प्रवेशनीयः तथा च हेत्वधि
करणपर्वताद्यवच्छेदेन धूमादौ वह्निमत्समवेतत्वाद्यभावसत्त्वादसंभव एव स्यात् यदि तेनैव संबंधेन साध्यवद्भिन्नत्वप्रवेशे न
स्यादिति भावः। ननु हेत्वधिकरणावच्छेद्यत्वविशिष्टस्य साध्यवद्भिन्नत्वाभावस्याधिकरणप्रसिद्ध्या लक्षणमिदं ऽसंभवि तदधिक
रणस्यैव तन्निष्ठधर्मावच्छेदकतया गगनजलत्वादौ वह्निमत्पर्वतसंयुक्तत्वाभावस्य धूमवत्पर्वतानवच्छेद्यत्वादत आह।
तादृशाभावश्चेति। हेत्वधिकरणावच्छेद्यसाध्यवद्भिन्नत्वाभावश्चेत्यर्थः। संबंधान्तरेण हेतुतावच्छेदकसंबंधान्यसम्बन्धेन
तथा च हेतुमत्पर्वतावच्छेद्यत्वविशिष्टस्य वह्निमत्संयुक्तत्वाद्यभावस्याधिकरणत्वं पर्वतीयरूपादावेव प्रसिद्धमिति भावः। य

सिं·ता ९ द्यपि रूपादौ वन्हिमत्संयुक्तत्वाद्यभावस्याव्याप्यवृत्तित्वात् तत्र पर्वतादिकं नावच्छेदकं भावाभावयोरेकत्र वृत्त्यर्थमेवावच्छेदकस्वीका
रादित्यप्रसिद्धिर्नादृशस्य न च महानसादिसंयुक्तकालिकादिसम्बन्धेन पर्वतादिनिष्ठघटादौ वन्हिमत्संयुक्तत्वाभावस्य पर्वताद्य
वच्छेद्यत्वप्रसिद्ध्या न दोष इति वाच्यम्। इत्थमपि एतद्रूपवानेतद्रूपादित्यादावेतद्वृत्त्याधिकरणावच्छेदेन एतद्रूपवत्समवेतत्वा
भावस्याप्रसिद्धेर्दुर्वारत्वात् तथापि पर्वतावच्छेदेन तदीयरूपेण वन्हिमत्संयुक्तत्वमित्यादिप्रतीत्याव्याप्यवृत्तेरवच्छेदकत्वस्वीका
रादित्यमभिधानं हेतुतावच्छेदकसंबंधेन साध्यवद्भिन्नत्वाभावविशिष्टस्य यस्याधिकरणं तदन्यत्वे वाग्रे ग्रंथतात्पर्यं तथा च व्या

स्वावयवे संयोगेन वन्हिमति च समवायेनावृत्तावपि न क्षतिः। तादृशाभावस्य सम्बन्धान्तरेण तत्रैव वर्तमाने सुलभः॥

प्यवृत्तेरवच्छेदकत्वासत्त्वेऽपि साध्यवद्भिन्नत्वाभावविशिष्टस्य यस्याधिकरणं तद्भिन्नत्वमादायैव लक्षणसंगतिः न च वस्तुग-
त्या साध्यवद्भिन्नत्वाभावविशिष्टस्य यस्याधिकरणं हेत्वधिकरणं तदन्यत्वोक्तौ वन्हिमान्धूमादित्यादावव्याप्तिः स्वावयवाव
च्छेदेन वन्हिमत्संयुक्तत्वाभाववतो धूमस्याधिकरणतायाः साधनवत्पर्वतादौ सत्त्वात् साध्यवद्भिन्नत्वाभावविशिष्टयद्व्यक्ति
त्वावच्छिन्नाधिकरणत्वं। हेतुमत्तदन्यत्वोक्तौ तु वन्हिमान् धूमादिदं वाच्यं ज्ञेयत्वादित्यादौ सर्वत्रैवासंभवः साध्यवत्संयु राम
क्तत्वादिविशिष्टतद्रूपादिव्यक्तित्वस्य गुरुतया प्रमेयरूपत्वावच्छिन्नायाः प्रतियोगितायाश्च तदवच्छिन्नाधिकरणत्वा ९

प्रसिद्धेः केवलस्यातिप्रसंगएवविशिष्टधर्मस्याधिकरणतानिरूपकतावच्छेदकत्वकल्पनादितिवाच्यंसार्वभौमानांमतेप्र
तियोगितायाइवाधिकरणताया अपिगुरुधर्मावच्छेद्यत्वोपगमात् अन्यथासमवेतत्वादिकमपेक्ष्यसत्तावत्समवेतत्वत्वस्यगुरुत
यासाध्यवद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्यासत्तावान्द्रव्यत्वादित्यादावव्याप्तिप्रसंगात् ननुसाध्यसामाना
धिकरण्यवतोनतदभाववत्त्वमतोद्रव्यंसत्त्वादित्यादौव्यभिचारिण्यतिप्रसंगइत्यतआह। व्यभिचारिणस्त्विति। तादृशीतिहे
तुनाघटकसम्बन्धेनहेतुमतीत्यर्थः। तादृशाभाववत्त्वंसाध्यवद्वृत्तित्वाभाववत्त्वं अत्रैवानुभवंप्रमाणयतिसत्तायामित्यादिए

व्यभिचारिणस्तुव्यभिचारनिरूपकाधिकरणएवतादृशितादृशाभाववत्त्वं। सत्तायांगुणेनद्रव्यत्वसामानाधि
करण्यमित्यनुभवात्। नचैवंगुणकर्मान्यत्वविशिष्टत्वेऽव्याप्तिः। विशिष्टस्यानतिरिक्तत्वात् १९ वंससत्तायामपिद्रव्यत्व

सामानाधिकरण्यविरहेविशिष्टसत्त्वइति। विशिष्टसत्त्वशब्दप्रतिपाद्यहेतावित्यर्थः यथाश्रुतेगुणकर्मान्यत्वविशिष्टसत्ता व्य
क्तावव्याप्त्याशंकायामुत्तरग्रन्थेनतन्निरासादसंगत्यापत्तेः। अनतिरिक्तत्वादिति। विशेष्यविशेषणाभ्यांभिन्नत्वादित्यर्थः। नयाः
चगुणादिकंनहेत्वधिकरणमतोनाव्याप्तिः उभयत्वमपिएकविशिष्टापरत्वमेवतच्चातिरिक्तमेवनातःस्पर्शवान्मूर्तत्वभूतत्वो
भयस्मादित्यादावव्याप्तिरितिभावः यद्यपिहेतुतावच्छेदकविशिष्टहेत्वधिकरणावच्छेदेनेत्युक्तावपिविशिष्टसत्तादिहे

सिंजा: तौनाव्याप्तिः नच धूमाधिकरणमहानसाद्यवच्छेदेन पर्वतीयादिधूमे वन्हिमत्संयुक्तत्वाभावस्य चालनीन्यायेन सत्वादव्याप्तिः
१० महानसादेरपि कालिकादिसम्बंधेन पर्वतीयधूमाधिकरणत्वात् तत्र साध्यवह्नित्वाभाववत्तायामवच्छेदकत्वादिति
वाच्यत्वावच्छिन्नाधिकरणावच्छेद्यसाध्यवह्नित्वाभाववद्वृत्तिधर्मवत्त्वमित्यस्यैव फलितार्थस्य तत्तद्धूमत्वधर्ममादा
येव लक्षणसंभवेन धूमत्वस्य हेतुतावच्छेदकत्वेपि क्षत्यभावात् तथापि विशिष्टस्यातिरिक्तत्वानन एवाव्याप्तिवारणसंभवे
हेतुतावच्छेदकावच्छिन्नाधिकरणत्वप्रवेशे गौरवमसंभवो वा विशिष्टनिरूपकाधिकरणत्वाप्रसिद्धेः एवं धूमत्वादेर्व्याप्य
तानवच्छेदकत्वेनातद्रूपेण कथायां हेतोरुपन्यासो न स्यादित्याशयः ननु विशिष्टसत्वस्यातिरिक्तत्वे मानाभावः नच गुणो विशिष्टसत्ता
वानिति प्रतीत्यभावस्यैव मानं। गुणस्य विशिष्टनिरूपिताधिकरणत्वविरहादेव तादृशप्रतीत्यसंभवात् नच विशिष्टनिरूपितमधिकरणत्वं
यद्यतिरिक्तं तदा विशिष्टमेवातिरिक्तमस्तु विशिष्टाधिकरणतायाः क्लृप्ताधिकरणतास्वरूपत्वाभ्युपगमात् किंच विशिष्टस्यातिरिक्तत्वे
द्रव्यं विशिष्टसत्तावदिति निर्णयदशायामपि द्रव्यं न सत्तावदिति प्रत्ययप्रसंगः सत्ताभाववद्बुद्धिं प्रति सत्तानिश्चयस्यैव विरोधित
यातदसत्वात्। स्वातंत्र्येण विरोधितान्तरकल्पने गौरवात् एवं विशेषणविशेष्योभयग्राहकसामग्रीविरहेपि विशिष्टग्रहप्रसंगः त
दुभयग्राहकसामान्याविशिष्टस्य ग्रहे हेतुत्वकल्पनेपि गौरवान्तरं स्फुटमेवेत्यत आह। अनतिरिक्तत्वे त्विति। गुरवस्तु विशिष्ट एम
स्यातिरिक्तत्वादिति ग्रंथस्य विशिष्टनिरूपिताधिकरणत्वस्यातिरिक्तत्वादित्यर्थः तथा च हेतुतावच्छेदकविशिष्टहेत्वधिकरणा १०

वच्छेदेन तादृशवह्नित्वाभाववत्त्वमपि निवेश्यमतो नाव्याप्तिरित्याशयः ननु विशिष्टाधिकरणत्वं यदि नातिरिक्तं विशिष्टसत्तावानिति प्र
तीतेः प्रत्येकनिरूपिताधिकरणताद्वयावगाहित्वेनैवोपपत्तेः अन्यथा विशेषणाभावनिर्णयदशायामपि विशिष्टसत्तावत्त्वप्र
तीत्यापत्तेः विशिष्टसत्ताबुद्धौ विशेषणाभाववत्ताज्ञानस्य प्रतिबंधकतायाः स्वातंत्र्येण कल्पनापातादित्युच्यते तदाप्याह। अनतिरि
क्तत्वेतीति प्राहुः। विशेषणेति विशेषणं तु गुणकर्मान्यत्वं विशेष्यं सत्ता तयोः सामानाधिकरण्यात्मकसंबंधस्यैवेत्यर्थः साक्षात्संबन्धे
न तस्य व्यभिचारित्वादाह। परंपरयेति। अवच्छेदकताख्यस्वरूपसंबंधेनेत्यर्थः सत्त्वगुणकर्मान्यत्वयोर्द्वयोरेव सामानाधिकर

अनतिरिक्तत्वे तु विशेषणविशेष्यसंबंधस्यैव परंपरयाव्याप्तत्वात्। केवलान्वयिनि चाव्याप्तेरभिधानं द्वितीयलक्षणाभि
प्रायेणेत्याहुस्तच्चिन्त्यं। सत्ता यां गुणे न द्रव्यत्वसामानाधिकरण्यमिति ११ ण्यमिति प्रतीत्यावच्छेदकतासम्बन्धेन तदुभयसा
मानाधिकरण्यस्य द्रव्य एव सत्त्वान्न व्यभिचार इति भावः। नन्वेवं ज्ञेयत्वाधिकरणपटाद्यवच्छेदेन वाच्यत्ववद्भिन्नत्वाभावस्य पटीय
रूपादावेव सत्त्वात्तदधिकरणभिन्नत्वमस्त्येव ज्ञेयत्वादिहेतोरित्यग्रे केवलान्वयिन्यव्याप्तिप्रदर्शनमसंगतमत आह। केवलान्व
यिनीति। द्वितीयेति। तत्र साध्यवद्भिन्नस्याप्रसिद्धत्वादिति भावः। यद्यपीदं वाच्यं प्रमेयादित्यादौ तादात्म्येन केवलान्वयिनि हे
तौ प्रथमलक्षणे व्याप्तिः संभवति प्रमेयावच्छेदेन वाच्यत्ववत्तादात्म्यकत्वविरहेणाऽप्रसिद्धेः। न च घटाद्यवच्छेदेन वाच्यत्वव

सिं·ज्ञा तादात्म्यविरहोघटत्वादौसुलभः।तथासति।घटत्वंघटेनवाच्यमितिप्रतीत्यापत्तेः तथापिस्वाधिकरणनिरूपितहेतुतावच्छेदकसम्ब
११ न्धेनसाध्यवद्वृत्तित्वाभावोऽत्रलक्षणघटकइत्यभिप्रायेणद्वितीयलक्षणाभिधानंस्वपदस्यततत्साधनव्यक्तिपरतयातादात्म्येनपटा
त्मकहेत्वधिकरणीभूतपटव्यक्तिनिरूपिततादात्म्येनवाच्यत्ववत्तादात्म्यकत्वाभावस्यपटावच्छेदेनपटत्वादावेवप्रसिद्धेः।व
स्तुतस्तुकेवलान्वयित्वंवृत्तिमदत्यन्ताभावाप्रतियोगित्वमात्रंनत्ववच्छेदकगर्भं।तथाचतादात्म्येनकिंचिदपिप्रमेयंनकेवलान्वयी
तिद्वितीयलक्षणेएवतादृशकेवलान्वयिन्यव्याप्तिसंभवात्यथाश्रुतमेवसम्यगितिध्येयं।नव्यास्तुकेवलान्वयिनिचाव्याप्तेरितिकेव

प्रतीतिर्हिद्रव्यत्वेगुणेनपृथिवीत्वसामानाधिकरण्यमितिप्रतीतिवत्सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यावच्छे
दकत्वस्यपरंपरासंबन्धेनसामानाधिकरण्यस्यवा॥२॥

लान्वयिसामान्येऽव्याप्तेरभिधानंद्वितीयलक्षणाभिप्रायेणेत्यर्थः।प्र
थमलक्षणेयत्किंचित्केवलान्वयिनितादात्म्येनप्रमेयादिहेतावव्याप्तावपिनक्षतिरित्याहुः सत्तायांगुणेनद्रव्यत्वसामानाधिकरण्य
मितिप्रतीतिः सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यस्यावच्छेदकत्वाभावंगुणाद्यवगाहतेइत्यत्रसमानाकारकप्रतीतिंदृष्टान्तयति।
द्रव्यत्वेगुणइतितनूक्तप्रतीतेगुणावच्छेदेनद्रव्यत्वेपृथिवीत्वसामानाधिकरण्याभावोविषयः गुणस्यद्रव्यत्वानधिकरणतयात राम
न्निष्ठपृथिवीवृत्तित्वाभावावच्छेदकत्वासंभवात्किंतुद्रव्यत्वनिष्ठंयत्पृथिवीत्वसामानाधिकरण्यंतदवच्छेदकत्वाभावएव ११

गुणेविषयइतितद्दीयमपिइतिभावः।अवच्छेदकत्वाभावमिति।प्रासङ्गिकभ्रमयाभिप्रायेणेदंसत्तायांगुणेनद्रव्यत्वसामानाधिकर
ण्यमित्यादिशाब्दस्थलेऽवच्छेदकत्वोपस्थापकपदांतरविरहात्तदभावस्यगुणादौबोधयितुमशक्यत्वात्।किंतुसत्तानिष्ठद्र
व्यत्वसामानाधिकरण्यंनगुणावच्छेद्यमित्याकारएवतत्रबोधःगुणाद्याविस्तत्रसप्तम्यर्थस्यनअर्थेऽन्वयादितिध्येयंनन्वे
वंतादृशप्रतीतेःसामानाधिकरण्याभावविषयकत्वमनुभवसिद्धंविरुध्येतसामानाधिकरण्यस्याव्याप्यवृत्तित्वेनतदवच्छेद
कत्वाप्रसिद्ध्यातादृशावच्छेदकत्वाभावविषयकप्रतीतेर्भ्रमत्वापत्तिश्चस्यादतआह।।परंपरासंबंधेनेति।।निरूपकताख्यस्व
रूपसंबंधेनेत्यर्थः।नत्ववच्छेदकताख्यस्वरूपसम्बन्धेनेत्यर्थः।तथासतिसत्तायांद्रव्येनद्रव्यत्वसामानाधिकरण्यमितिप्रती
तिप्रसङ्गात्।सामानाधिकरण्यस्याव्याप्यवृत्तितयाकुत्राप्यवच्छेदकत्वसंबंधेनतस्यासत्त्वात्।नत्विति।तथाचद्रव्यंसत्त्वादि
त्याद्यावतिव्याप्तिरितिभावः।।ननूक्तदृष्टांतस्थलेबाधकसत्त्वादवच्छेदकत्वाभावोऽस्तुप्रतीतेर्विषयःप्रकृतेतुसत्तायांसामानाधि
करण्याभावविषयकत्वेनकिंचिद्बाधकमस्तीत्यतोबाधकमाह।।सत्तानेति।।तथाचसत्तायांद्रव्यवृत्तित्वाभावसत्त्वेद्रव्यवृत्ति
त्वाभाववद्वृत्तित्वधीस्तत्रनस्यादितिभावः।ननुद्रव्यवृत्तित्वाभावोऽव्याप्यवृत्तिरेवेतितद्वृद्धेदोप्यवृत्तिर्वाच्यः।तथाचद्रव्यगु
णात्मकविभिन्नावच्छेदेनतयोःसत्तायांसमवेशात्कुतोविरोधइत्यतआह।।द्रव्यवृत्तित्वाभावइतिनन्वेवंमूलेनकपिसं
योगीतिप्रतीत्यादृष्टावेकपिसंयोगाभावोपिनसिद्ध्येत्तत्रापिवृक्षनिष्ठसंयोगावच्छेदकत्वाभावस्यमूलेवगाहनसंभवाद

सिं.जा. न आह॥ बाधकाभावादिति॥ कपिसंयोगाभावो न वृक्षवृत्तिरित्यादिप्रत्ययस्यासंभवादिति भावः॥ ननु द्रव्यवृत्तित्वाभावो
१२ न सत्तावृत्तिरिति प्रतीतिरेवासिद्धा द्रव्यवृत्तित्वाभावो गुणावच्छेदेन सत्तावृत्तिरिति प्रत्ययात्॥ एकशेषस्य कर्तुमश-
क्यत्वाद्दतो दोषांतरमाह॥ अतीन्द्रियेति॥ मनस्त्ववदणुत्वादित्यादावित्यर्थः। तत्र अतीन्द्रियसाध्यके असद्धेतौ॥

अभावं गुणेऽवगाहते। न तु सत्तायामेव द्रव्यवृत्तित्वाभावं सत्ता न द्रव्यवृत्तित्वाभाववती द्रव्यवृत्तित्वा
भावेन। सत्तावृत्तिरित्यादिसर्वजनप्रसिद्धप्रतीतिबाधितत्वात्। बाधकाभावात्तु संयोगतदभावयोर
वच्छेदकभेदेनैकत्र प्रतीत्या न तूभयोरेकत्र सिद्धिः। अतीन्द्रियसाध्यकेऽतीन्द्रिये व्यभिचारिण्यतिप्र
संगाच्च॥

ननु प्रत्यक्षासंभवेनाप्यणुत्वं मनस्त्वसामानाधिकरण्याभाववन्मनस्त्वाभाववद्वृत्तित्वात् पृथिवीत्ववदित्यनुमानेनैव तत्र
सामानाधिकरण्याभावः सेत्स्यतीत्यत आह॥ न चेति॥ तद्वृत्तीति साध्यवद्वृत्तिभिन्नत्वस्येत्यर्थः॥ तथा चोक्तानुमाने मनस्त्व राम
वत् वृत्तिभिन्नत्वमुपाधिः तस्य च साध्यव्यापकत्वं घटत्वादौ साधनाव्यापकत्वं द्रव्यत्वादौ ग्राह्यं भेदस्याव्याप्यवृत्तित्वे १२

तुसाध्यवह्नितत्तद्व्यक्तित्वावच्छिन्नभेदकूट उपाधिर्बोध्यः ननूक्तोपाध्यप्रतिसंधानदशायामुक्तानुमानादेवसाध्यवह्
नित्वाभावसिद्धिस्तत्रभविष्यति अन्यथाव्याप्यंतरस्यापितत्रातिप्रसङ्गादित्यत आह। किंचिदमित्यादि।। तथाचकालोगो
मान् गोत्वादित्यादौकालिकसम्बंधेनहेतावव्याप्तिः। कालिकसम्बंधेनहेतुमतिमहाकालेतेनसंबंधेनकालवृत्ति-
त्वाभावस्यकुत्राप्यसत्वात् नचकालावच्छेदेनगगनादावेवसाध्यवह्नित्वाभावस्यप्रसिद्धिः कालस्यगगनाद्यनधिक

तत्रसामानाधिकरण्याभावस्यप्रत्यक्षत्वासंभवेनासिद्धेः। नचतदभाववह्नित्वेनतत्रतदनुमेयं।। तद्वृत्ति
तिभिन्नत्वस्योपाधित्वात्।। ६।।

रणत्वेनतन्निष्ठवृत्तित्वाभावेकालावच्छेद्यत्वासंभवात् कालिकसम्बन्धेनगगनादेर्वृत्तिमत्वस्वीकाराच्च यद्यपिगोत्वाद्यधिकर
णतत्तत्क्षणावच्छेदेनकालवृत्तित्वाभावस्यतत्तत्क्षणासमानकालीनेनतत्तत्क्षणगोचरज्ञानेनप्रसिद्धिः तत्तत्क्षणस्यापिविषयतया
स्वविषयकज्ञानाधिकरणतयातन्निष्ठतादृशवृत्तित्वाभाववत्तायामवच्छेदकत्वसंभवात्। तथापिमहाकालएवकालिक-
सम्बन्धेनाधिकरणंउपाधीनांतुनतत्तद्वृत्तितायामवच्छेदकत्वमात्रमितिप्राचीनसिद्धांतमनुरुध्येत् महाकालनिरूपित-

विशेषणतयावाहेनाव्याप्तिरीदृश्याइदमिदानीमित्याकारकप्रतीतिनियामकविशेषणतायायोविशेषस्तेन हेतुतायामिति व्याख्य
यानादृशविशेषणतायाः प्राप्तेः सामान्यत एव विभिन्नकालीनयोर्नाधाराधेयभाव इति मतेनानुपपत्तिगन्धोपि स्वसमानका
लीनस्य विषयतयाप्यनधिकरणत्वेन तदवच्छेदेन ज्ञाने साध्यवद्वृत्तित्वाभावप्रसिद्ध्यसंभवादिति ध्येयं॥ अत्र हेतुतावच्छेदकसं
बन्धेन स्वाधिकरणे स्वनिरूपित हेतुतावच्छेदकसंबंधेन साध्यवद्वृत्तित्वाभावस्य विवक्षायां न कोपि दोषः साधनगोत्वाधिकरणमहाका

किन्त्व इदमिदानीमिति प्रतीतिनियामकविशेषणताविशेषणे हेतुतायां सद्धेनाव्याप्तिः।
तेन संबंधेनाधिकरणे कालेतेन संबंधेन साध्यवद्वृत्तित्वस्य विरहिणोऽप्रसिद्धेः॥

लावच्छेदेन गोत्वनिरूपितकालिकसंबंधेन साध्यवद्वृत्तित्वाभावस्य घटादावेव प्रसिद्धत्वात् साध्यसामानाधिकरण्यत्वयद्धर्मावच्छि
न्नाधिकरणावच्छेद्य हेतुत्वनिकारसन्नाभावप्रतियोगितानवच्छेदकं तद्धर्मवत्त्वं वा विवक्षितम्। इत्थं च वाच्यं प्रमेयादित्यादौ प्रमेयव्य
क्तीनां भेदेपि नाव्याप्तेर्भेद इत्यस्मद्गुरुचरणाः॥ केचित्तु स्वनिष्ठं यत्साध्यवद्वृत्तित्वं हेत्वधिकरणावच्छेद्यतदभावाधिकरणाभिन्नत्वमित्य
र्थः। नादृशाभावाधिकरणत्वं सद्धेतुस्थले स्वभिन्नव्यक्तावेव प्रसिद्धमतो नाव्याप्तिरित्याहुः साध्यवद्वृत्तित्वाभावाधिकरणत्वसामा

न्येयन्निष्ठत्वयदधिकरणावच्छेद्यत्वोभयाभावस्तत्त्वंव्याप्तिः पर्वतीयरूपनिष्ठंयत्सर्वतावच्छेद्यंवन्हिमत्संयुक्तत्वाभावाधिकरणत्वेनतन्म
द्रूपनिष्ठंयच्चधूमनिष्ठंनतद्रूपाधिकरणावच्छेद्यमधिकरणभेदेनतत्सत्तानानात्वात्। अन्यथापर्वतेतरीयरूपेनवन्हिमत्संयुक्तत्वमितिवत्पर्वते
धूमेनवन्हिमत्संयुक्तत्वमित्यादिप्रतीत्यापत्तेः अतोवन्हिमान्धूमादित्यादौनाव्याप्तिः व्याप्यवृत्तेरवच्छेदकत्वास्वीकारेतुतादृशाभावाधि
करणत्वसामान्येयदधिकरणावच्छेद्यत्वसामान्याभावस्तत्त्वमित्येववाच्यमित्यादिकंपुनरुक्तत्वादुपेक्षितंवाच्यत्वादिसाध्यकेताद
त्म्येनहेतावव्याप्तेश्चवाच्यत्ववत्तादात्म्याभावाप्रसिद्धेः एतेनसत्तायांकर्मणिनद्रव्यत्वसामानाधिकरण्यमितिप्रतीतेःकर्मणद्रव्यकसत्त्व
योःसमवायस्याप्यवच्छेदकत्वंभासते अन्यथाइदानींसत्तायांनद्रव्यत्वसामानाधिकरण्यमित्यादिप्रतीत्यापत्तेः एतत्कालस्यकर्मातिरेका
त्‌एवंचयद्धेतुव्याप्यधिकरणीयहेतुतावच्छेदकसंबन्धेसाध्यवद्वृत्तित्वाभावावच्छेदकत्वंनास्तितत्त्वमित्यर्थः कालोगोमान्गोत्वादित्या
दौकालवृत्तित्वाभावावच्छेदकत्वस्यद्रव्यत्वादिनिष्ठआत्मसमवेतत्वादावप्रसिद्धस्यगोत्वाधिकरणीयकालिकसम्बन्धेविरहान्नाव्या
प्तिरित्यपिनिरस्तमितिसंक्षेपः॥ इतिसिंहव्याघ्रलक्षणद्वयपूरणं॥ समाप्तोयं॥ शुभंभवतु॥ श्रीसंवत् १९४६ मि॰ जेठव
दि ४॥॥

इस्तिहार दिया जाता है ग्राहक लोगों को की बम्बई · आगरा · मेरट · लखनऊ · कलकता · इलाहाबाद
बनारस और कई एक छापे की पुस्तकें हमारे यहां मौजूद हैं
जिन महाशयों को लेने की इच्छा होय तो आध आने का
टिकट भेज के सूची मगवाय लेवें इस कार्य के सम्पादक बाबू कौलेश्वर सिंह बुकसेलर बनारस।

इति जागदीशी पंचलक्ष्मी समाप्ता